# shrIviShNupUjAstotram

# શ્રીવિષ્ણુપૂજાસ્તોત્રમ્

## Document Information


Text title : viShNupUjAstotram

File name : viShNupUjAstotram.itx

Category : vishhnu, pUjA

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : April 12, 2018

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.



October 3, 2021

*sanskritdocuments.org*

# શ્રીવિષ્ણુપૂજાસ્તોત્રમ્

શાન્તાકારં ભુજગશયનં પદ્મનાભં સુરેશં
વિશ્વાધારં ગગનસદૃશં મેઘવર્ણં શુભાઙ્ગમ્ ।
લક્ષ્મીકાન્તં કમલનયનં યોગિભિર્ધ્યાનગમ્યં
વન્દે વિષ્ણું ભવભયહરં સર્વલોકૈકનાથમ્ ॥ ૧॥

આરાધયામિ મણિસન્નિભમાત્મવિષ્ણું
માયાપુરે હૃદયપઙ્કજસન્નિવિષ્ટમ્ ।
શ્રદ્ધાનદીવિમલચિત્તજલાભિષિક્તં
નિત્યં સમાધિકુસુમૈરપુનર્ભવાય ॥ ૨॥

જ્યોતિશ્શાન્તં સર્વલોકાન્તરસ્થમોઙ્કારારવ્યં યોગિહૃદ્ધ્યાનગમ્યમ્ ।
સાઙ્ગં શક્તિં સાયુધં ભક્તસેવ્યં સર્વાકારં વિષ્ણુમાવાહયામિ ॥ ૩॥

કલ્પદ્રુમે મણિવેદિમધ્યે સિંહાસને સ્વર્ણમયં સરત્નમ્ ।
વિચિત્રવસ્ત્રાવૃતમચ્યુત પ્રભો ગહાણ લક્ષ્મીધરણીસમન્વિત ॥ ૪॥

પાદોદકં તે પરિકલ્પયામિ પુણ્યં સરિત્સાગરતોયનીતમ્ ।
પાદ્યં પ્રદાસ્યે સુમનસ્સમેતં ગૃહાણ લક્ષ્મીધરણીસમન્વિત ॥ ૫॥

બ્રહ્મેન્દ્રરુદ્રાગ્નિમુનીન્દ્રસેવ્યપાદારવિન્દામ્બુદસન્નિભાઙ્ગ ।
અર્ઘ્યં ગૃહાણાશ્રિતપારિજાત શ્રિયા સહામ્ભોજદલાયતાક્ષ ॥ ૬॥

તીર્થોદકં ગાઙ્ગમિદં હિ વિષ્ણો ત્રિવિક્રમાનન્ત મયા નિવેદિતમ્ ।
દધ્યાજ્યયુક્તં મધુપર્કસંજ્ઞં ગૃહાણ દેવેશ યથાક્રમેણ ॥ ૭॥

આકલ્પસંશોભિતદિવ્યગાત્ર રાકેન્દુનીકાશમુખારવિન્દ ।
દત્તં મયા ચાચમનં ગૃહાણ શ્રીકેશવાનન્ત ધરારિદારિન્ ॥ ૮॥

તીર્થોદકૈઃ કાઞ્ચનકુમ્ભસંસ્થૈસ્સુવાસિતૈર્દેવ સુમન્ત્રપૂતૈઃ ।
મયાર્પિતં સ્નાનમિદં ગૃહાણ પાદાબ્જનિષ્ઠ્યૂતનદીપ્રવાહ ॥ ૯॥

મન્દાકિની જહ્નુસુતાર્ય ગૌતમી વેણ્યાદિતીર્થેષુ ચ પુણ્યવત્સુ ।
આનીતમમ્ભો ઘનસારયુક્તં શ્રીખણ્ડમિશ્રં કુસુમાદિસંશ્રિતમ્ ॥ ૧૦॥

કામધેનોસ્સમુદ્ભૂતં દેવર્ષિપિતૃતૃપ્તિદમ્ ।
પયો દદામિ દેવેશ સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥ ૧૧॥

ચન્દ્રમણ્ડલસઙ્કાશં સર્વદેવપ્રિયં દધિ ।
સ્નાનાર્થં તે મયા દત્તં પ્રીત્યર્થં પ્રતિગૃહ્યતામ્ ॥ ૧૨॥

આજ્યં સુરાણામાહારમાજ્યં યજ્ઞે પ્રતિષ્ઠિતમ્ ।
આજ્યં પવિત્રં પરમં સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥ ૧૩॥

સર્વૌષધિસમુત્પન્નં પીયૂષમમૃતં મધુ ।
સ્નાનાર્થં તે પ્રયચ્છામિ ગૃહાણ પરમેશ્વર ॥ ૧૪॥

ઇક્ષુદણ્ડસમુદ્ભૂત દિવ્યશર્કરયા હરિમ્ ।
સ્નપયામિ સદા ભક્ત્યા પ્રીતો ભવ સુરેશ્વર ॥ ૧૫॥

સ્વર્ણાઞ્ચલં ચિત્રતરં સુશોભિતં કૌશેયયુગ્મં પરિકલ્પિતં મયા ।
દામોદર પ્રાવરણં ગૃહાણ માયાબલપ્રાવૃતદિવ્યરૂપ ॥ ૧૬॥

સુવર્ણતન્તૂદ્ભવયજ્ઞસૂત્રં મુક્તાફલસ્યૂતમનેકરત્નમ્ ।
ગૃહાણ તદ્ભક્તિપ્રિયમુત્તરીયં સ્વકર્મસૂત્રાન્તરિણે નમોઽસ્તુ ॥ ૧૭॥

કસ્તૂરિકાકર્દમચન્દનાનિ કાશ્મીરસંયોજિતગન્ધસારૈઃ ।
વિલેપનં સ્વીકુરુ દેવદેવ શ્રીદેવિવક્ષોજવિલેપનાઙ્ગ ॥ ૧૮॥

શ્રીગન્ધં ચન્દનોન્મિશ્રં કર્પૂરેણ સુસંયુતમ્ ।
વિલેપનં સુરશ્રેષ્ઠ પ્રીત્યર્થં પ્રતિગૃહ્યતામ્ ॥ ૧૯॥

શ્લોક ૨૦ મિસ્સિન્ગ્।
સેવન્તિકાવકુલચમ્પકપાટલાબ્જૈઃ
પુન્નાગજાતિકરવીરરસાલપુષ્પૈઃ ।
બિલ્વપ્રવાલતુલસીદલમલ્લિકાભિઃ
ત્વાં પૂજયામિ જગદીશ્વર મે પ્રસીદ ॥ ૨૧॥

આરામપુષ્પાણિ મનોહરાણિ જલાશયસ્થાનિ સુપલ્લવાનિ ।
સુવર્ણપુષ્પાણિ મયાર્પિતાનિ ત્વં ગૃહ્યતાં દેવવર પ્રસીદ ॥ ૨૨॥

કેયૂરકટકે ચૈવ હસ્તે ચિત્રાઙ્ગુલીયકમ્ ।

માણિક્યોલ્લાસિ મકુટં કુણ્ડલે હારશોભિતમ્ ॥ ૨૩॥

નાભૌ નાયકરત્વં ચ નૂપુરે પાદપદ્મયોઃ ।
અઙ્ગુલીમુદ્રિકાશ્ચૈવ ગૃહાણ પુરુષોત્તમ ॥ ૨૪॥

શ્રીખણ્ઠલાક્ષાસિતકાષ્ઠદિવ્યકર્પૂરકાલાગુરુકર્દમાનિ ।
સ્વચોરકાચન્દનદેવદારુમાંસીનખં શૈલજપૂતિકાશ્ચ ॥ ૨૫॥

કાલાગુરુપ્રચુરગુગ્ગુલુગન્ધધૂપૈ-
    ર્નાનાવિધૈસ્સુરભિતૈઃ ખલુ ધૂપ્યમાનૈઃ ।
ત્વાં ધૂપયામિ રઘુપુઙ્ગવ વાસુદેવ
    લક્ષ્મીપતે મયિ દયાં કુરુ લોકનાથ ॥ ૨૬॥

સૂર્યેન્દુકોટિપ્રભ વાસુદેવ દીપાવલિં ગોઘૃતવર્તિયુક્તામ્ ।
ગૃહાણ લોકત્રયપૂજિતાઙ્ઘ્રે ધર્મપ્રદીપાન્કુરુ દીપ્યમાનાન્ ॥ ૨૭॥

સ્વામિન્ લક્ષ્મીશ દેવેશ ભક્તલોકદયાનિધે ।
જ્ઞાનતોઽજ્ઞાનતો વાપિ ભક્ત્યા શક્ત્યા સમર્પિતમ્ ॥ ૨૮॥

મયોપનીતં નૈવેદ્યં પઞ્ચભક્ષ્યસુભોજનમ્ ।
મક્ષિકા મશકાઃ કેશાઃ પૃથુ બીજાનિ વલ્કલાઃ ॥ ૨૯॥

પાષાણમસ્થિકં સર્વં કૃમિકીટપિપીલિકાઃ ।
એતાન્સવાન્પરિત્યજ્ય શુચિપાકાનિ યાનિ વૈ ॥ ૩૦॥

તાનિ સર્વાણિ ગૃહ્ણીષ્વ મયા દત્તાનિ માધવ ।
કદલીપનસામ્રાણાં સુપક્વાનિ ફલાનિ ચ ॥ ૩૧॥

અન્નં ચતુર્વિધં સૂપં સદ્યસ્તપ્તઘૃતં દધિ ।
મયા સમર્પિતં સર્વં સઙ્ગૃહાણ શ્રિયા સહ ॥ ૩૨॥

સૌવર્ણસ્થાલિમધ્યે મણિગણખચિતે ગોઘૃતાક્તાગન્ સુપક્વાન્
ભક્ષ્યાન્ભોજ્યાંશ્ચ લેહ્યાનપરિમિતમહાચોષ્યમન્નં નિધાય ।
નાનાશાકૈરુપેતં દધિમધુસુગુડક્ષીરપાનીયયુક્તં
તામ્બૂલં ચાપિ વિષ્ણો પ્રતિદિવસમહો માનસે કલ્પયામિ ॥ ૩૩॥

સુપૂગરવણ્ડૈશ્ચ સુશુભ્રપર્ણૈસ્સુશઙ્ખચૂર્ણૈર્ઘનસારમિશ્રૈઃ ।
મયાર્પિતં દેવ દયાસમુદ્ર તામ્બૂલમેતત્પ્રમુદા ગૃહાણ ॥ ૩૪॥

નીરાજનં સ્વીકુરુ દેવદેવ નીલોત્પલશ્રીકર નીરજાક્ષ ।

ગૃહાણ દેવાસુરમૌલિરત્નમરીચિનીરાજિતપાદપદ્મ ॥ ૩૫॥

પુષ્પાઞ્જલિં સ્વીકુરુ પુષ્કરાક્ષ પ્રસન્નકલ્પદ્રુમપારિજાત ।
ઇન્દ્રાદિવૃન્દારકવન્દ્યપાદ નમોઽસ્તુ તે દેવવર પ્રસીદ ॥ ૩૬॥

યાદિ કાનિ ચ પાપાનિ જન્માન્તરકૃતાનિ ચ ।
તાનિ તાનિ પ્રણશ્યન્તિ પ્રદક્ષિણપદેપદે ॥ ૩૭॥

પાપોઽહં પાપકર્માહં પાપાત્મા પાપસમ્ભવઃ ।
ત્રાહિ માં કૃપયા દેવ શરણાગતવત્સલ ॥ ૩૮॥

અન્યથા શરણં નાસ્તિ ત્વમેવ શરણં મમ ।
તસ્માત્કારુણ્યભાવેન રક્ષ રક્ષ જનાર્દન ॥ ૩૯॥

નમોસ્ત્વનન્તાય સહસ્રમૂર્તયે સહસ્રપાદાક્ષિશિરોરુબાહવે ।
સહસ્રનામ્ને પુરુષાય શાશ્વતે સહસ્રકોટિયુગધારિણે નમઃ ॥ ૪૦॥

આવાહનં ન જાનામિ ચ જાનામિ વિસર્જનમ્ ।
પૂજાં ચૈવ ન જાનામિ ક્ષમસ્વ પરમેશ્વર ॥ ૪૧॥

યસ્ય સ્મૃત્યા ચ નામોક્ત્યા તપઃ પૂજાક્રિયાદિષુ ।
ન્યૂનં સમ્પૂર્ણતાં યાતિ સદ્યો વન્દે તમચ્યુતમ્ ॥ ૪૨॥

મન્ત્રહીનં ક્રિયાહીનં ભક્તિહીનં જનાર્દન ।
યત્પૂજિતં મયા દેવ પરિપૂર્ણં તદસ્તુ તે ॥ ૪૩॥

અપરાધસહસ્રાણિ ક્રિયન્તેઽહર્નિશં મયા ।
દાસોઽયમિતિ માં મત્વા ક્ષમસ્વ પરમેશ્વર ॥ ૪૪॥

મત્સમો નાસ્તિ પાપિષ્ઠઃ ત્વત્સમો નાસ્તિ પાપહા ।
ઇતિ સઞ્ચિન્ત્ય દેવેશ યથેચ્છસિ તથા કુરુ ॥ ૪૫॥

ભૂમૌ સ્ખલિતપદાનાં ભૂમિરેવાવલમ્બનમ્
ત્વયિ જાતાપરાધાનાં ત્વમેવ શરણં મમ ॥ ૪૬॥

ગતં પાપં ગતં દુઃખં ગતં દારિદ્ર્યમેવ ચ ।
આગતા સુખસમ્પત્તિઃ પુણ્યાચ્ચ તવ દર્શનાત્ ॥ ૪૭॥

રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ।
પુત્રાન્ દેહિ ધનં દેહિ સર્વાન્કામાંશ્ચ દેહિ મે ॥ ૪૮॥

ઇતિ વિષ્ણુપૂજાસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*shrIviShNupUjAstotram*

pdf was typeset on October 3, 2021

Please send corrections to *sanskrit@cheerful.com*